**संस्कृतवार्ताः**

**दिनाङ्क : 27/02/2026** **सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी पारदर्शितां उत्तरदायित्वं च प्रवर्धयितुं कृत्रिम-मेधायाः, खण्ड-शृङ्खलायाः तथा दत्तांश-विश्लेषणस्य च प्रयोगाय आग्रहं कृतवान्।
- आयव्ययकस्य अनन्तरं आयोजितायाम् एकस्यां अन्तर्जालीय-सङ्गोष्ठ्यां प्रधानमन्त्री भावि-परिष्काराणां तथा च व्यापार-सुगमतायै नीतीनां प्रभावी-क्रियान्वयने बलं दत्तवान्।
- दिल्ल्याः न्यायलयेन अद्य मद्यनीति-सम्बद्ध-वञ्चनायां पूर्व-मुख्यमन्त्री अरविन्द-केजरीवालः तथा पूर्व-उपमुख्यमन्त्री मनीष-सिसोदिया च दोषमुक्तौ घोषितौ।
- तृतीय-त्रैमासिके भारतस्य अर्थव्यवस्था तावत् सप्त-दशांश-अष्टप्रतिशतमितेन वेगेन संवर्धिता ।
- पाकिस्तानेन अफगानिस्तानं विरुध्य युद्धस्य घोषणा कृता अन्यप्रान्तेषु वायु-आक्रमणैः सह ऑपरेशन ग़ज़ब लिल-हक इत्यपि आरब्धम्

**अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री-संगोष्ठी**

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् सर्वकारः प्रक्रियाणां सरलीकरणं, व्यापार-सुगमतायाः संवर्धनं तथा तन्त्रज्ञानाधारित-शासनस्य विस्तारं करोति। सः सबलं प्रावोचत् यत् अस्माकम् अवधानं केवलं नीतिगत-उद्देश्येषु न भवेत् अपितु एतां गतिं वर्धयितुं वितरण-उत्कृष्टतायाम् अपि भवेत् । प्रधानमन्त्री नरेन्द्रमोदी अद्य 'विकसित-भारताय तन्त्रज्ञानं, परिष्कारः , वित्तं च इति विषयम् अधिकृत्य आयोजिताम् आयव्ययकोत्तर-अन्तर्जालीय-सङ्गोष्ठीं दृश्य-श्रव्य-माध्यमेन सम्बोधितवान्।

प्रधानमन्त्री अवदत् यत् राष्ट्रिय-आयव्ययकः केवलम् अल्पकालिक-वित्तीय-अभिलेखत्वेन न, अपितु दीर्घकालिक-नीति-मार्गसूचकत्वेन द्रष्टव्यः।

प्रधानमन्त्री प्रोदीरितवान् यत् विगतैकदशके सर्वकारेण आधारभूत-संरचनायाः विकासे अतीव अवधानं दत्तम् । सः प्रतिपादितवान् यत् सर्वकारेण विचारपूर्वकं अयं निर्णयः स्वीकृतः यत् भारतस्य विकासः राजमार्गाणां, रेलमार्गाणां, पत्तनानां (Ports), अङ्कीय-जालस्य तथा विद्युत्-तन्त्रस्य चेत्यादीनां दृढ-परिसम्पत्तीनां निर्माणेनैव भविष्यति ।

श्रीमोदी अवदत् यत् इयं अन्तर्जालीय-संगोष्ठी विचार-विनिमयस्य मञ्चः न भवेत् । सः प्रतिपादितवान् यत् यदा उद्योगाः, शिक्षाविदः , विश्लेषकाः नीति-निर्मातारः च मिलित्वा चिन्तयन्ति, तदा योजनानां क्रियान्वयनं श्रेष्ठं भवति तेन च उत्तम-परिणामाः प्राप्यन्ते।

**प्रधानमन्त्री-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी श्वः राजस्थान-गुजरात-राज्ययोः यात्रां करिष्यति। राजस्थानस्य अजमेर-नगरे सः षोडश-सहस्र-कोटि-रूप्यतोऽप्यधिकानां विकास-परियोजनानां उद्घाटनं, शिलान्यासञ्च करिष्यति । अत्रान्तरे सः एकां जनसभाम् अपि सम्बोधयिष्यति। तेन चतुर्दशवर्षीयाणां बालिकानां कृते ग्रीवा-कर्करोगस्य निवारणाय राष्ट्रव्यापी HPV-प्रतिरक्षण-अभियानम् प्रारप्स्यते। सहैव अत्रावसरे असौ राज्यस्य विभिन्न-सर्वकारीय-विभागेषु संस्थासु च नवनियुक्तेभ्यः युवकेभ्यः अष्टशताधिक-एकविंशतिसहस्राधिकानि नियुक्ति-पत्राणि वितरिष्यति। ततः परं सः गुजरात-राज्ये, प्रधानमन्त्री साणन्द-नगरे 'माइक्रोन सेमीकंडक्टर टेक्नोलॉजी इण्डिया प्राइवेट लिमिटेड' इत्यस्याः 'अर्धचालक-संयोजन-परीक्षण-वेष्टन' सुविद्यायाः उद्घाटनमपि करिष्यति।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**केजरीवाल-न्यायालयः**

दिल्ल्याः न्यायलयेन अद्य मद्यनीति-सम्बद्ध-वञ्चनायां पूर्व-मुख्यमन्त्री अरविन्द-केजरीवालः तथा पूर्व-उपमुख्यमन्त्री मनीष-सिसोदिया च दोषमुक्तौ घोषितौ। न्यायालयेन केन्द्रीयान्वेषणाभिकरणस्य आरोपपत्रं निराकृतम्। विशेष-न्यायाधीशः जितेन्द्र-सिंहः अवदत् यत् आरोपपत्रे बहवः दोषाः सन्ति तथा च एतत् साक्ष्यैः समर्थितं नास्ति। न्यायलयेन अस्मिन् प्रकरणे अन्ये एकविंशतिजनाः अपि विनिर्मुक्ताः । आम-आदमी-पार्टीतिदलस्य राष्ट्रिय-संयोजकः केजरीवालः अवदत् यत् तस्य न्याय-व्यवस्थायां पूर्णः विश्वासः अस्ति।

केन्द्रीयान्वेषणाभिकरणेन उक्तं यत् अस्य आदेशस्य विरुद्धं शीघ्रमेव दिल्ली-उच्चन्यायालये याचिकां प्रस्तोष्यति। अपरपक्षे, भाजपा-प्रवक्ता सुधांशु-त्रिवेदी अवदत् यत् साक्ष्याभावात् एव अभियुक्ताः मुक्ताः अभवन्। सः आरोपं कृतवान् यत् अस्मिन् प्रकरणे शतशः दूरभाषयन्त्राणि सिम-यन्त्राणि च विनष्टीकृतानि आसन्।

**जीडीपी-प्रदत्तांशः**

सांख्यिकी-कार्यक्रम-कार्यान्वयन-मन्त्रालयेन अद्य विज्ञापितं यत् द्विसहस्रतमस्य-पञ्चविंशस्य-षड्विंशस्य च वित्तीय-वर्षस्य तृतीय-त्रैमासिके भारतस्य अर्थव्यवस्था सप्त-दशांश-अष्टप्रतिशतमितेन वेगेन संवर्धिता, सम्पूर्ण-वर्षस्य च वास्तविक-जीडीपी-विकासमानाङ्कः सप्त-दशांश-षट्-प्रतिशतमितं भविष्यतीति अनुमीयते ।

**अफ़गान-पाक-सङ्घर्षः**

अफ़गानिस्तानेन अद्य पाकिस्तान-देशस्य सैन्य-केन्द्रेषु प्रतिशोधात्मकं वायु-आक्रमणं कृतम्, अत्र तावत् इस्लामाबाद-नौशेरा-जमरूद-एबटाबाद-नगराणां सैन्य-स्थानानि सम्मिलितानि सन्ति। तालिबान-प्रवक्त्रा हमदुल्ला फितरत इत्यमुना प्रोदीरितं यत् एतानि आक्रमणानि सैन्य-शिबिराणि , लक्ष्यीकृत्य कृतानि। एतानि आक्रमणानि काबुल-कन्धार-पक्तिया-क्षेत्रेषु पाकिस्तानी-वायुसेनायाः पूर्व-आक्रमणानाम् प्रत्युत्तररूपेण कृतानि।

अफ़गानिस्तानस्य रक्षा-मन्त्रालयेन प्रोक्तं यत् चतुर्होरा-पर्यन्तं प्रवृत्ते सीमा-सङ्घर्षे पञ्चपञ्चाशत्-पाकिस्तानी-सैनिकाः मृताः, द्वौ सैन्य-स्थानानि एकोनविंशतिः सीमा-केन्द्राणि ध्वस्तानि जातानि । अस्मिन् सङ्घर्षे अष्टौ अफ़गान-सैनिकाः वीरगतिं अवाप्नुवन् , एकादश-सैनिकाश्च व्रणिताः अभवन्। अनेन आक्रमणेन शरणार्थी-शिबिरे त्रयोदश-सामान्यनागरिकाः अपि व्रणिताः अभवन् । अपरपक्षे पाकिस्तानेन 'ऑपरेशन ग़ज़ब लिल-हक' इति आरब्धम्, यस्यान्तर्गतं तस्य वायुसेनया पूर्वमपि आक्रमणानि कृतानि। इस्लामाबादेन प्रमाणितं यत् न्यूनातिन्यूनं त्रयस्त्रिंशदधिक-शतम् तालिबान-योद्धारः मृताः।

**वैष्णवः—शिखर-सम्मेलनम्**

सूचनाप्रौद्योगिकी-मन्त्री अश्विनी-वैष्णवः प्रोक्तवान् यत् कृत्रिम-बुद्धिमत्तायाः उपयोगे विश्वसनीयतायाः महती आवश्यकता वर्तते। अद्य अपराह्णे नवदिल्ल्याम् वार्ताहर -समूहेन आयोजिते राइजिंग-भारत-शिखर-सम्मेलने' सम्बोधयन् श्रीवैष्णवः AI-परिवर्तनं

गम्भीरतया स्वीकर्तुं बलं प्रदत्तवान्। सः अवदत् यत् प्रत्येकं कार्यं सक्रियतापूर्वकं करणीयम्। मन्त्रिणा प्रतिपादितं यत् सर्वकारः प्रतिभा-वाहिन्याः सज्जतायै विशेषं ध्यानं प्रयच्छति । सः एतदपि प्रोक्तवान् यत् राज्य-सर्वकारैः अपि अस्मिन् विषये बहवः प्रयासाः विधातव्याः । श्रीवैष्णवः अवदत्

यत् एतत् मनसि निधाय सर्वकारेण प्रायः चतुर्भ्यः वर्षेभ्यः पूर्वं सूचनाप्रौद्योगिकी-संस्थया (IT Industry) सह मिलित्वा 'भावि-कौशलकार्यक्रमः समारब्धः ।

**ईरान्-अमेरिका**

इरान्-देशस्य विदेशमन्त्री अब्बास् अराघ्ची-वर्यः अवदत् यत्, इरान्-देशस्य परमाणु-कार्यक्रमस्य विषये अमेरिकादेशेन सह परोक्ष-वार्ता देशस्य बृहत्तमासु वार्तासु अस्ति इति। ईरान्-देशस्य राज्य-दूरदर्शन-वाहिन्याः साक्षात्कारे अराग्ची ह्यः टिप्पणीं कृतवान्। सः किमपि विवरणं न अयच्छत्, परन्तु यत् भवितव्यं तत् इरान-पक्षतः स्पष्टतया स्पष्टीकृतम् अस्ति इति अवदत्। अमेरिका-देशः अद्यापि वार्तायाः विषये टिप्पणीं न कृतवान्।

वैट्-हौस् इत्यनेन तत्क्षणमेव टिप्पणी-निवेदनस्य प्रत्युत्तरं न दत्तम्। ईरान्-अमेरिका-देशौ तेहरान्-देशस्य परमाणु-कार्यक्रमस्य विषये ह्यः बहुकालं यावत् अप्रत्यक्षं वार्तालापं कृतवन्तौ, परन्तु विना सन्धिं निरूढवन्तौ ।

**भारत-ब्रिटेनसंवादः**

षष्ठः भारत-ब्रिटेन गृहप्रकरणानां संवादः अद्य नवदिल्ल्यां समजायत। उभयपक्षौ वर्तमानसहयोगस्य समीक्षाम् अकुरूताम् ।भयोत्पादन-निरोधे अथ च सङ्घटित-अपराधस्य निवारणार्थं च गहनसहयोगस्य क्षेत्राणां परिचयः कृतः, यथा खालिस्तान समर्थक-उग्रवादः , ब्रिटेन इत्यत्र भारत-विरोधी-समूहानां गतिविधयः, मादकद्रव्याणां व्यापारः, प्रवासः, आपराधिक-न्यायः, विधि-प्रवर्तनम्, साइबर-सुरक्षा च। भारतीय प्रतिनिधिदलस्य नेतृत्वं सीमा-प्रबन्धन-सचिवः राजेन्द्रकुमारः अकरोत्, ब्रिटेनपक्षस्य नेतृत्वं गृह-मंत्रालयस्य द्वितीय-स्थायी-सचिवः सिमोन् रिडले इत्यनेन कृतम् आसीत्।

**॥ इति वार्ताः ॥**